# द्विचतुष्क चक्र बन्धः

देवताराधितां श्रीदां वन्दे सादरमिन्दिरां ।

देहि तापाधिदाश्रीघ्नां वज्रि सादरवन्दितां ॥ 10 ॥

देवता इति । स्पष्टोर्थः ।







## गरुडगति चक्र बन्धः

रक्षाधीश्वरमादक्ष क्षान्त्याधीरतमाक्षर ।

रजोचिन्त्यातुलश्व भ्रात् पूतनावेदनाकर ॥ 11 ॥

रक्षेति । अधीश्वर-सर्वेश्वर । धीरतम-अतिधीर । अक्षर-नित्य । पूतनावेदनाकर-श्रीकृष्ण । रजसा-रजस्तमोभ्यां अचिन्तयं अतुलञ्च यत् श्वभं संसार भीति भावः तस्मात् मा-मां, क्षान्त्या - क्षमया रक्ष । तव क्षमा अभावे मद्रक्षणकथैव नास्तीति भावः ।

# कविनाम विषयनामाङ्क षडरचक्र बन्धः

लक्ष्मी राजितवत्स मेघनिभभाशालिन् नमद्रक्षकं

सर्वामर्त्य मनस्थित मुनिनुत श्री चक्र शंकृत्समं ।

भर्माभं प्रणमामि पुण्यनिलयं शक्रस्य पूतं सदा

दासोऽहं ललितं समोद भवतः कंजाभमंघ्रिं मुदा ॥ 12 ॥



लक्ष्मीति । लक्ष्मी राजित वत्स - रमा शोभित वक्षस्थलं । मंघनिभ भाशलिन् काळमेघ तुल्य कान्त ! मुनिनुत श्रीचक्र ! सुदर्शनेन अनेक सुरादि खण्डनात् मुनिनुतं तं चक्रस्येति बोध्यं । समोदं - नित्यानन्दः हे भगवन् इति शेषः । नमत् रक्षकं शरणागत रक्षकं । सर्वेत्यादि सकलामरध्यान विष्यमित्यर्थः । शंकृत् - सुखकरं । समं वैषम्य रहितं । भर्माभं - स्वर्ण सदृशं । शक्रस्य पुण्य निलयं । इन्द्रसंबन्धि सुकृत निलयं - इन्द्रस्य पदे पदे असुरैरुपद्रव संभवात् तन्निरासार्थं भगवदंघ्रि समाश्रयेण तन्निरासात् तत् सुकृतस्य फलजनकत्वं भगवदंघ्रि द्वारा इति तत्सुकृतस्य तन्निष्ठत्वोक्तिः । पूतं - सर्वपावनं, ललितं रम्यं यद्वा सुलभं कञ्जाभं - पद्मतुल्यं भवतः अंघ्रिं सदा दासोऽहं - प्रणमामि ।

त्रितियषष्ठकोष्टयोः ''रामभद्रकृत वनमालि चक्र'' इत्युद्धारः (द्रष्टव्यः)

# गुरुनाम कर्तृनामविषय नामाङ्कितः अष्टारबन्धः

श्रीशावीन्दुवराक्ष रक्ष विमति क्रौर्य स्वकामप्रिय
  श्रीनिक्षिप्त समस्वचित्त विशरीराविद्धमूला अमी ।
वार्यन्तेक्षजना हिताध्व विदिशिस्राकृदुर्हृदात्मस्पृशा
  सन्नान्नाम ममातनुन्नविद्तुः पूषाश्चभेनाविन ॥ 13 ॥




प्रथम त्रितीय षष्ठाकोष्टेषु उद्धारश्लोकस्तु (एवं)
  श्री श्रीवास यमीशान वीक्षितेनामलात्मना ।
  राम नामार्य विदुषा रचिता नुतिरीशितुः ॥ 14 ॥

गुरु इति । अवीन्दुवराक्ष - रविचन्द्ररूप श्रेष्ठनयन-विमति क्रैर्य-विरुद्ध मतिषु पुरुषेषु क्रौर्यं यस्य । स्वकामाः ज्ञानिनः तत् प्रिय । समं - निर्वैषम्यं । स्व चित्तं श्री निक्षिप्तं यस्य । इन-प्रभो हे श्रीश ! विशरीरेण-मन्मथेन अविद्धमूलाः आहत स्वमूल भूत मनस्काः सर्वस्यापीन्द्रिय व्यापारस्य मनोधीनत्वात् तन्मूलत्वं तस्येति भावः । अमी-मत्संबन्धिनः अक्षाणि - इन्द्रियाण्येव जनाः अक्षजनाः । तेषां स्वश्यत्व अभावेन स्वातन्त्र्योद्यतनाय जना इति । हिताध्वविदिशि-हितरूप भक्तिमार्गस्य विदिशि-विरुद्धमार्गे स्राक् झटिति वार्यन्ते तत् तत् विष्यैरितिशेषः । अत्रायं भावः । सुकृत लवेन मम मनसि भक्तिमार्गोन्मुखे सति मन्मथः तत् कलुषी करोति । तदा शब्दादि विषयाः तत् तत् इन्द्रियाणि स भक्तिमार्गगतिं निरुध्वा तानि आकर्षन्तीति । तस्मादित्यर्थः। आत्मस्पृशा - अत्रात्म शब्दो यत्नपरः । प्रयत्नवता दुर्हृदा - दुष्टहृदयेन मम अतनुं अधिकं संगं - विषय संबन्धं पापसंबन्धं वा । पूषा रविः अश्चभेनः अश्छानां भानां इनः-चन्द्रः तावपि न विदुतुः । सूर्यचन्द्रयोः सर्व पाप साक्षित्वात् मत् कर्तृक पाप समूहः तयोरपि अविषय इति भावः । नामेति संभावनायां । तयोरप्यविषय इति मन्ये इत्यर्थः ।

उद्धार श्लोके-श्रीत्यादि । श्रीमत् श्रीनिवास यतीन्द्र महादेशिकाव्य स्वाचार्य कटाक्षितेन अत एव निर्मल स्वरूपेण रामभद्र विदुषा ईशितुः भगवतः नुतिः रचितेति ।

---

# त्रितियूयं मन्त्र प्रकरणम्

## तत्र द्वादशाक्षर गोरथ बन्धः



ओं कनद्वसनामोघकरुणानि भ लोचन ।
श्रीपते भगवन्देवदेव दानवनाशन ॥ 15 ॥
कंसाराते नमस्तुभ्यं बहुधा वासवानुज ।
करोमि सुगुणान्देहि न देहित्वं स्तवाश्रय ॥ 16 ॥

ओमिति । ओं-प्रणव वाच्य भूतं । कनद्वसन-पीतांबरेत्यर्थः । अमोघकरुण । अनिभलोचन । तुभ्यं नमः बहुधा करोमि । सुगुणान् - अपहत पाप्मत्वादि गुणान् देहि । देहित्वं - संसारभित्यर्थः (पुनरपिजननं) न देहि । शिष्टं स्पष्टं । (देहित्वं न देहि - मोक्षं देहि इति भावः)




## अष्टाक्षर ढक्का बन्धः

ओं रमेश करोत्येष सन्नतोहं नमोऽधुना ।
रामायणादराणात्तु पात्राब्जे नयनायते ॥ 17 ॥

मध्यकोष्टेषु "ओं नमो नारायणाय" इत्यष्टाक्षरोद्धारः । ओमिति । ओं - प्रणववाच्य भूतरमेश-श्रियः पते । सन्नतः प्रणतः एषोऽहं । रामायणादराणां पात्रे - श्रीमद्रामायण भक्तिविशेषशालि पुरुषरक्षकाय पुण्डरीकाक्षाय तुभ्यं अधुना नमः करोमि इत्यर्थः ।




(உடுக்கை)



# षडक्षरोलूखल बन्धः

ओं नमो भगवन् तुभ्यं विभो दीनदयासमो ।
श्रीपते विषयाणाञ्जिष्णवेस्तु प्रभवे सदा ॥ 18 ॥

मध्यकोष्टेषु ''ओं नमो विष्णवे'' इति विष्णुषडक्षरोद्धारः । ओमिति । असमो इति ऊकारः रश्रक्षणवाची, असमः ऊः-रक्षणं यस्य सः असमोः तस्य संबुद्धिः-असमो । विभोभगवन् दीनदय हे श्रीपते । विषयाणां जिष्णवे स्वाधीन सर्वेन्द्रियायेत्यर्थः । प्रभवे तुभ्यं सदा नमोस्तु । ओमिति पूर्ववत् । ऊकारः पुरुषे चन्द्रे राजपुत्रे गळे सुरे । प्राङ्गणोपमेयोः पूर्णकुम्भे वणिजि रक्षणे इति नानार्थ रत्नमाल ।




# पञ्चाक्षर भृङ्गारक बन्धः

शंभुश्शिवाप्रियः श्रीदाता देवादिवन्दितश्शिक्षां ।
कालस्य योमलात्मा चक्रे विष्णुं पुनस्सवै वेत्ति ॥ 19

मध्यकोष्टेषु ''नमश्शिवाय'' इति शिवपञ्चाक्षरोद्धारः । शंभु इति । यः चक्रे स शिव एव विष्णुं वेत्ति - सर्वज्ञत्वात् स एव भगवन् माहात्म्यं वेत्ति नान्यः इत्यर्थः । वै इत्यवधारणे । पुनरिति वाक्यालङ्कारः । शिष्टं स्पष्टम् ।



# चतुर्थ भोगोपकरणबन्ध प्रकरणम्

## चित्रान्दोळिका बन्धः

शंमे कुर्यादमन्दं कमलवरसदृक्पादहस्तेक्षणं श्रीः

कंसश्रेयोहरस्स्राक् कुमति निशिचरध्वंसकृत्धूतसंगः ।

श्रीमान् क्षीराब्धिजेशः खरतरमुरहाऽपारसारस्थिरश्रीः

मायाहेयामयार्तात्स्मरपुरहरतः कञ्जयोनेश्च पूज्यः ॥ 20 ॥

शन्मेति । स्राक्-शीघ्रं कंसश्रेयोहरः । खरतरः अतिक्रूरो यो मुरः तं हन्तीति - मुरहा । मायैव-प्रकृतिरेव हेयामयः दुष्टरोगः तदार्तात् । स्मर पुरहरतः स्मरं पुरान् त्रिपुराञ्च हरति नाशयतीति - स्मरपुरहरः रुद्रः तस्मात् तदपेक्षया कञ्जयोनेश्च-चतुर्मुखापेक्षया च पूज्यः । मायेत्यादि विशेषणं चतुर्मुखस्यापि बोध्यं । आब्रह्मस्तम्भपर्यन्ता इति वचनेन तयोरपि प्रकृतिवश्यत्वात् अकर्मवश्यो भगवानेव मे अमन्दं शं-सुखं मोक्षानन्दमित्यर्थः कुर्यात् । शिष्टं स्पष्टम् ।



# साधारणान्दोळिका बन्धः

वन्दे परक्रूरदरश्रियं त्वां नित्यासम श्रीमहिमक्षमेश ।

भवाब्धिगन्मामवलोकय त्वं तं त्वा रमेशं न विना गतिर्मे ॥ 21 ॥

वन्देति । परेत्यादि-परेषां शत्रूणां क्रूरो या दरश्रीः शंख शोभा यस्य तं । शंख शब्देन शत्रूणां हृदयश्रवणादि निर्भेदात् तत् श्रीच्शत्रुभिरसह्येति भावः । श्रीः- शोभा महिमा-माहत्म्यं एते । नित्यासमे-सर्वकालेपि तुल्यरहिते ते यस्य क्षमेश-भूनायक त्वां वन्दे । शिष्टं स्पष्टम् ।



# सवितान मञ्च बन्धः

कान्त्या कामसमं समस्त विहितं तं राघवेन्द्रं भजे

जेतारं सुरसार सूर कुलजं ताद्रन्दनृ पोन्यो नहि ।

कोरक्षोरणरङ्गनिस्तुलबलो बद्धाबधीशोभवेत्

रक्षोधीश्वरदारसारगुणभित् कोपप्रपन्नोपरः ।। 22 ।।




कान्त्येति । बद्धाबधीशः - अपाम् अधीशः अबधीशः - समुद्र सः बद्धः येन सः । रक्षो धीश्वरणां-राक्षसश्रेष्ठानां दाराणां - पत्नीनां यस्सारगुणः - कण्ठसूत्रं तत् भित् कोपप्रपन्नः - कोपरचना यस्य सः । एवं भूतः अपरः तत्वयतिरिक्तः कः ? कोऽपि नास्तीत्यर्थः । श्री राघवस्यकोपे सति रक्षसस्त्रीणां वैधव्यं सिद्धमिति । तत् कण्ठसूत्रकभेदत्वं कोपप्रपन्नस्याक्तम् । प्रपन्नो निष्कृतौ स्तोमे रचनायं विपर्यये इति नानार्थ रत्नमाला । शिष्टं स्पष्टम् ।।

## साधारण मञ्च बन्धः

श्रीभूमिनीळा सहितं तं वन्देऽखिलनायकम् ।

हितार्थि ना पुनः पुंसा कंसारिः प्राप्य उच्यते ॥ 23 ॥

श्रीति । स्पष्टोर्थः ।




## डोळा बन्धः



श्रीमत्वदंघ्रिमतुलं मनसा भजेम त्वत्सेवका न तु कदाप्यपमा भवन्ति ।

कञ्जेक्षणाच्युत तवस्तव भावकं मा दामोदराव सदर स्थिरनीरदाभ ॥ 24 ॥

श्रीति । अपमाः अज्ञानिनः । सदर- सशंख । स्थिरा या नीरदस्याभा-तत्वदाभा यस्य-नीरदाभायास्थिरत्वा भावने कदाचित् श्वैत्यसंभवात् स्थिरत्व विशेषणं तवस्तव भावकं त्वदीय स्तुतिरसिकथा मा-मां अव । शिष्टं स्पष्टम् ।